V.P.M'S B. N. Bandodkar College of Science, Thane

F.Y.J.C. First Term Examination - January 2023

Date - 06/01/2023 Subject – संस्कृत Time – 2.30 pm to 5.00 pm

Day - Friday Marks – 50

---

## प्रथमः विभागः – सुगमसंस्कृतम् । (४)

प्र. १ अ चिह्नस्य अर्थं संस्कृतभाषया लिखत। (३ तः २) २

१.



२.




3.



आ व्यावहारिकशब्दस्तबकतः शब्दं चित्वा उचितस्तम्भे लिखत। (५ तः ४) २

| आहारः | भाण्डागारः |
| --- | --- |
| | |

(वटकः कटाहः पायसम् शूर्पः वेष्टिः)

## द्वितीयः विभागः – पद्यम् । (८)

प्र. २ अ पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत। ४

अयं रुचिकरात्सूपः रुच्यः पित्तविनाशकः।
सर्वैर्गुणैस्समाविष्टो लघुरूपो निरामयः ॥
मथितं शर्करायुक्तमेलाचूर्णविमिश्रितम्।
कर्पूरधूपितं नाम्ना मज्जिकेत्यभिधीयते ॥

निष्पीड्य दधि वस्त्रेण स्रावयेत्तद् द्रुतं जलम्।

शर्करैलासमायुक्ता सूदैः शिखरिणी मता ॥

स्रावितं यद्द्रुतं तोयं जीरकार्द्रकसैन्धवैः।

संयुक्तं हिंगुधूपेन धूपितं मस्तु कीर्तितम् ॥

१ **अवबोधनम्** । (३ तः २) २

क पूर्णवाक्येन उत्तरं लिखत।

का मज्जिका इति अभिधीयते ?

ख वाक्यं पुनर्लिखित्वा सत्यम् / असत्यम् इति लिखत।

यत् स्रावितं धृतं तोयं तत् कर्पूरपुष्पमुख्यैः धूपितं 'मस्तु' इति कीर्तितम्।

ग नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत।

शर्करा-एलासमायुक्ता <u>सूदैः</u> 'शिखरिणी' मता। (एतद्)

२ **पृथक्करणम्** । २

क पद्यांशात् योग्यं विशेषणं चित्वा जालरेखाचित्रं पूरयत ।




**प्र. २ आ पद्यांशं पठित्वा माध्यमभाषया सरलार्थं लिखत।** ४

कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।

को विदेशः सुविद्यानां कोऽप्रियः प्रियवादिनाम् ॥

मुक्ताफलैः किं मृगपक्षिणां च मिष्टान्नपानैः किमु गर्दभानाम् ।

अन्धस्य दीपो बधिरस्य गीतं मूर्खस्य किं शास्त्रकथाप्रसङ्गः ॥

## तृतीयः विभागः – गद्यम् । (१५)

**प्र ३ अ गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** ४

तत्र मधुरः रसः बल – वर्ण – इन्द्रिय – त्वक् – केश - कण्ठहितः, प्रीणनः, मूर्च्छातृष्णाप्रशमनः, स्निग्धः, शीतो, मृदुर्गुरुश्च । एवंगुणोऽपि स अत्युपयुज्यमानः लोचनगदान् चावहेत्। अम्लः शीतस्पर्शो बोधयतीन्द्रियाणि, रोचनः, पाचनः, दीपनः, स्निग्धो, हृद्यश्च । जनयति शिथिलत्वं सेवितः सोऽति देहे कफ-पाण्डुता-रुग्विघातान्।

लवणः सर्वरसप्रत्यनीको, दीपनो, रोचनः, पाचनः, हरति पवनं, विष्यन्दयति कफं, विशोधयति स्रोतांसि । क्षत – विष - मदवृद्धिं करोति, क्षपयति बलमोजः सोऽति वा सेवनेन । तिक्तः स्वयमरोचिष्णुः, अरुचि – विष - कण्डूहरः मेध्यश्च । खर – विशद - रौक्ष्यभावैः सोऽतिसमासेवितः मूर्च्छा – ग्लानि – भ्रम - वातरोगान् परुषत्वं च कुर्यात् ।

कटुकः स्थौल्य – कृमि – वक्त्ररोग - कण्डुप्रशमनः, शोषयत्यन्नं, स्फुटयतीन्द्रियाणि, भिनत्ति शोणितसङ्घातम् । कुरुतेऽ तिनिषेवितः स तृष्णा – मद – मूर्च्छा – वमि - मोह - देहसादान् । कषायो बलासं सपित्तं सरक्तं निहन्त्याशु अतिरुक्षः । अत्यभ्यासात् सोऽपि तृष्णाऽऽध्मानपक्षाघातादींश्च कुर्यात् ।

१ अवबोधनम् । (३ तः २) २

क उचितं कारणं चित्वा वाक्यानि पुनर्लिखत।

तिक्तः अतिसमासेवितः परुषत्वं करोति, यतः ..............................।

१) तस्मिन् खरविशदरौक्ष्यभावाः सन्ति । २) सः वातरोगान् करोति ।

ख वाक्यं सत्यम् असत्यं वा लिखत ।

कटुकः कण्डूवर्धकः।

ग पूर्णवाक्येन उत्तरं लिखत ।

मधुररसः कस्य प्रशमकः ?

२ शब्दज्ञानम् । (३ तः २) २

क नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।

लवणः स्रोतांसि विशोधयति । (तद्)

ख समानार्थकशब्दान् लिखत ।

१. रुधिरम् = ________ । २. वायुः = ________ ।

ग विशेषण - विशेष्याणां मेलनं कुरुत ।

| अ | आ |
| --- | --- |
| कषायः | हृदयः |
| अम्लः | अतिरुक्षः |
| | अरोचिष्णुः |

**प्र ३ आ गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** ४

आसीत् राजा शूद्रको नाम । तस्य राज्ञः विदिशाभिधाना नगरी राजधान्यासीत् । एकदा प्रतिहारी राजानमब्रवीत् - देव, द्वारस्थिता काचित् कन्यका अन्येन केनचित् पुरुषेण सह पञ्जरस्थं शुकमादाय देवं विज्ञापयति, "अहमिच्छामि देवदर्शनसुखमनुभवितुम् ।" एतदाकर्ण्य उपजातकुतूहलस्तु राजा, "को दोषः, प्रवेश्यताम्", इत्यादिदेश ।

तदा प्रतिहारी तां कुमारीं प्रावेशयत् । सा कन्यका राजानं प्रणनाम । स पुरुषस्तं विहङ्गममादाय किञ्चिदुपसृत्य राज्ञे न्यवेदयत्, "देव, विदितसकलशास्त्रः सकलभूतलरत्नभूतः अयं वैशम्पायनो नाम शुकः तदयमात्मीयः क्रियताम् ।" एवं नरपतेः पुरो निधाय पञ्जरमुदघाटयत्। उद्घाटिते स विहङ्गराजो राजानमुद्दिश्य राजस्तुतिपरमेकं श्लोकं पपाठ |

राजा तं श्रुत्वा सञ्जातविस्मयः प्रधानममात्यं कुमारपालितमब्रवीत्, "श्रुता भवद्भिरस्य विहङ्गमस्य स्पष्टता वर्णोच्चारणे, स्वरे च मधुरता ? महदाश्चर्यम् ! प्रायेण पक्षिणः पशवश्च भयाहारनिद्रासंज्ञामात्रवेदिनो भवन्ति । इदन्तु महच्चित्रम् ।" कुमारपालितः नृपमवदत्, "देव! किमत्र चित्रम् ? एते शुकसारिकाप्रभृतयो विहङ्गविशेषा यथाश्रुतं वाचमुच्चारयन्ति ।"

वचनमेतत् श्रुत्वा नरपतिः वैशम्पायनमब्रवीत्, "आस्तां तावत् सर्वमेवेदम्, अपनयतु नः कुतूहलम्, आवेदयतु भवानादितः । निवेदयतु भवतः पूर्ववृत्तान्तम्।" वैशम्पायनस्तु सादरमब्रवीत्, "देव, महतीयं कथा यदि कौतुकमाकर्ण्यताम्।"

१ **अवबोधनम् । (३ तः २)** २

क कः कं वदति ।

"अहमिच्छामि देवदर्शनसुखमनुभवितुम्" ।

ख पूर्णवाक्येन उत्तरत ।

कः राजस्तुतिपरं श्लोकं पपाठ ?

ग रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत।

पुरुषः नरपतेः पुरः निधाय पञ्जरम् उदघाटयत् । (तद्)

२ शब्दज्ञानम् । (३ तः २) २

क सर्वनामस्थाने नाम सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।

प्रायेण ते भयाहारनिद्रासंज्ञामात्रवेदिनः भवन्ति (पक्षिन्)

ख विरुद्धार्थकशब्दान् लिखत ।

१. निन्दा × ________ । २. संदिग्धता × ________ ।

ग द्वे पूर्वकालवाचक – धातुसाधित - अव्यये चित्वा लिखत।

इ पद्यांशं पठित्वा माध्यमभाषया सरलार्थं लिखत। ३

संस्कृतमाध्यमेन पत्रकारिता शनैः शनैः प्रगतिपथम् अगच्छत् । ऑगस्टमासस्य एकविंशतितमे दिने चतुर्नवनवैकतमे ख्रिस्ताब्दे (२१ ऑगस्ट १९९४) दूरदर्शनेन साप्ताहिकं संस्कृतवार्तापत्रं प्रसारितम्। साम्प्रतं दूरदर्शनद्वारा प्रतिसप्ताह प्रसार्यमाणः 'वार्तावलिः' इति कार्यक्रमः विशेषोल्लेखनीयः । तस्य आशयवैविध्यं रोचक प्रस्तुतीकरणं च प्रेक्षकान् रञ्जयतः ।

ई माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत। (२ तः १) ५

१. संस्कृतभाषायाः प्रसारः इत्यपि एतासां पत्रिकाणाम् उद्दिष्टम् ।

२. "आवेदय भगवन्, कथमस्य सम्भवः, किमभिधानो वायम् ।"

## चतुर्थः विभागः – साहित्यपरिचयः। (६)

प्र. ४ उचितं विकल्पं चित्वा वाक्यं पुनर्लिखत। (७ तः ६) ६

१. सामान्यजनानां वेदः .................... ।

(सामवेदः, अथर्ववेदः, यजुर्वेदः)

२. ओङ्कारसाधनायाः चर्चा .................... वर्तते।

(संहितायाम् , आरण्यकग्रन्थे, ब्राह्मणग्रन्थे )

३. संहिताः .................... सन्ति ।

(तिस्रः, त्रयी, चतस्रः)

४. उपनिषद् नाम .................... ।

(कर्मकाण्डम् , उपासनाकाण्डम् , ज्ञानकाण्डम् )

५. नृपाणां वंशावलिः इति .................... प्रमुखविषयः।

(कथासाहित्यस्य, पुराणस्य, रामायणस्य)

६. रामायणे .................... काण्डानि सन्ति।

(सप्त, त्रीणि, दश)

७. ब्रह्म नाम .................... ।

(प्रजापतिः, यज्ञः, वेदः)

## पञ्चमः विभागः – लेखनकौशलम् । (५)

**प्र.५ अधोनिर्दिष्टाः कृतीः कुरुत। (२ तः १)**

**१ मञ्जूषातः उचितान् शब्दान् चित्वा रिक्तस्थानानि पूरयित्वा चित्रपटवर्णनं पुनर्लिखत।** ५

भयपटः ।

गतसप्ताहे _________ भयपटः दृष्टः । तस्य नाम 'स्त्री' इति । एतस्मिन् चित्रपटे श्रद्धा कपूरमहोदया प्रमुखा नायिका। राजकुमार रावमहोदयः _________ अभिनेता च । एकस्मिन् ग्रामे 'स्त्री' इति एका _________ पूजासमये रात्रौ आगत्य पुरुषाणाम् अपहरणं करोति । एतस्मिन् समये पार्श्वे भयकारिध्वनिः _________। तस्याः निवारणार्थं जनाः द्वारे 'ओ स्त्री कल आना' इति _________ लिखन्ति ।

अन्ते या चित्रपटस्य _________ सा एव खलनायिका नाम 'स्त्री' इति दिग्दर्शकः सूचयति । चित्रपटस्य संवादाः _________गूढं निर्मान्ति । गीतानि अपि _________ गेयानि च सन्ति । प्रायः सर्वेभ्यः/सर्वाभ्यः एषः चित्रपटः _________ यतः तस्य अन्तपर्यन्तं गूढः _________ वर्तते ।

(वाक्यम् प्रमुखः एकः जायते अनाकलनीयः निशाटा नायिका रोचते अधिकं रम्याणि)

अथवा

२ उपपदविभक्तेः उपयोगं कृत्वा संस्कृतवाक्यानि लिखत । (६ तः ५) ५

१. रुच् – रोच्
२. स्निह्
३. रक्ष्
४. अभितः
५. अलम्
६. कृते

## षष्ठः विभागः – भाषाभ्यासः । (९)

प्र.६ अधोनिर्दिष्टाः कृतीः कुरुत । १२

अ समासतालिकां पूरयत । (४ तः ३) ३

| | समस्तपदम् | समासविग्रहः | समासनाम |
|---|---|---|---|
| १ | अचिरात् । | ___________ । | नञ् - तत्पुरुषः । |
| २ | प्राप्तख्यातिः । | प्राप्ता ख्यातिः येन सः । | ___________ । |
| ३ | ___________ । | पाकं जानाति इति । | उपपदतत्पुरुषः । |
| ४ | प्रतिविभागम् । | ___________ । | अव्ययीभावः । |

आ नाम – सर्वनामतालिकां पूरयत । (४ तः ३) ३

| | नाम | प्रातिपदिकम् | अन्तम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| १ | भाषासु | भाषा | आकारान्त | _________ | सप्तमी | _________ |
| २ | एतस्य | _________ | सर्वनाम | नपुंसकलिंग | _________ | एकवचन |

इ संधिविग्रहं कुरुत । (४ तः ३) ३

१. अत्रागतो ऽस्मि - अत्र + _________ + अस्मि ।
२. _____________ - कषायः + तु ।
३. स्मरेन्नित्यम् । - _________ + नित्यम् ।
४. _____________ - अवतार्य + अत्र ।

ई सूचनानुसारं परिवर्तनं कुरुत। (४ तः ३)

१. मनुजः अपकारान् विस्मरेत्। (वाक्यं लट् लकारे परिवर्तयत।)

२. शिवदासः प्रतिप्रश्नं कृतवान् । (वाच्यपरिवर्तनं कुरुत।)

३. देवदत्तः स्नानं कृत्वा ईश्वरं प्रणमति। (पूर्वकालवाचकं निष्कासयत।)

४. त्वं कार्यालयं कदा गच्छसि ? (त्वं स्थाने भवान् योजयत।)

## अष्टमः विभागः – अपठितम् । (३)

**प्र.८ संस्कृतवाक्यानां माध्यमभाषया अनुवादं कुरुत । (५ तः ३)**

१. भारतवर्षे शास्त्रीयसंगीतस्य महती परम्परा वर्तते ।

२. पातञ्जलयोगसूत्रेषु मानसशास्त्रस्य चर्चा अपि दृश्यते ।

३. माता भोजनं कृत्वा कार्यालये गच्छति ।

४. उदिते सूर्ये खगाः आकाशे उड्डयन्ति ।

५. रामेण युद्धे रावणः हतः।